धार्मिक स.नं. ८

# संन्यासविधिः

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1.)

सन्या० श्रीगजाननाय नमः अथ सन्यासकर्मारं प्रति ब्रह्मानंदीयपद्धतिमनुसृत्य प्रयोगमात्रमु
१ च्यते तत्रादौ औपासनाग्निं यजमानं प्रति तादृशविधुरं प्रति च प्रयोगः तत्रादौ निस्पृहः सर्वतः
शांत इत्यादि लक्षणैर्युक्तो भिक्षुं गुरुं संशोध्य तन्निकटे वर्षमेकं षण्मासं त्रिमासं मासं वा व
सन् यतिधर्मान्संवीक्षमाणः सर्वेषणां त्यजन् निषिद्धप्रतिग्रहान्निवृत्तो गायत्रीजपरुद्रा
ध्यायजपकूश्माण्डहोमरूपपुरश्चरणमादौ कृत्वा गुरोराज्ञां च लब्ध्वा उदगयनादौ प्रश
स्ते काले सन्यासमारभेत् कस्मिंश्चिद्दिने मायांतिथौ कृतमाध्याह्निकः सायाह्ने गंगादौ देश
कालौ संकीर्त्य अमुकशर्मणो मम करिष्यमाणसन्यासे योग्यतासिध्यर्थं चतुः कृच्छ्रात्मकप्रा
यश्चित्तं प्रतिकृच्छ्रमेकैकगोनिष्क्रयद्रव्यद्वारा अहमाचरिष्ये इति संकल्प्य कृच्छ्रप्रत्याम्नायगो राम
निष्क्रयद्रव्यं ब्राह्मणेभ्यो दातुमहमुत्सृजे इति संकल्पपूर्वकं ब्राह्मणेभ्यो दत्वा एकादशप्रांहा १

(7A)

दश्पां वा ब्रह्मरात्रिर्यथा भवति तथा श्राद्धान्यारभेत् तत्र संन्यासेऽधिकारार्थं स्वस्य नवश्राद्ध
षोडशश्राद्धानि च साग्निः पार्वणविधिना निरग्निकस्त्वेकोद्दिष्टविधिना कुर्यात् सपिण्डीक
रणमपि केषांचिन्मते उक्तं तत्कर्तव्यं चिकीर्षायां तदपि कार्यम् एवं नवश्राद्धादीनां प्रयोग
स्तु ब्रह्मानन्दीयपद्धतौ ज्ञेयः केचित्तु नवश्राद्धादेः सपिण्डीकरणस्य च नावश्यकत्वं
अत्युक्तोश्रमपद्धतौ अनुक्तत्वात् आचाराभावाच्चेति वदन्ति अथाष्टौ श्राद्धप्रयोगः तत्रा
पस्तंबयजमानकर्तृके अग्नौकरणहोममंत्रे ऊहस्यासंभवात् पिंडदाने विकल्पदर्शना
त्संकल्पविधिरेवावतिष्ठते आश्वलायनानां तु स्वाहाकारेण वाग्निपूर्वं यज्ञोपवीतीत्य
ग्नौकरणे विधेराम्नानात् पिंडदाने विकल्पदर्शनात् पार्वणविधिरेव तत्रापस्तंबानां प्रयो
गः श्राद्धपाकादन्येन वान्नेन वैश्वदेवं कृत्वा ततो नद्यादौ गत्वा प्राङ्मुखो यज्ञोपवीती

(2)

स॰ यवसहितजलेनश्राद्धदेवतानांतर्पणमादौकुर्यात् तर्पणप्रकारस्तु ब्रह्माणंतर्पयामि॥
२ विष्णुं॰ महेश्वरं॰ देवर्षीं॰ ब्रह्मर्षीं॰ क्षत्रर्षीं॰ वसूंस्त॰ रुद्रांस्त॰ सनकं॰ सनंदनं॰ सनात
नं॰ पृथिव्यादीनिपंचमहाभूतानि॰ एकादशचक्षुरादीनिकरणानि॰ चतुर्विधभूतग्रामं॰
पितरं॰ पितामहं॰ प्रपितामहं॰ मातरं॰ पितामहीं॰ प्रपितामहीं॰ आत्मानं॰ पितरं॰ पि
तामहंतर्पयामि इतितर्पणंविधाय[illegible]त्यदेशकालौसंकीर्त्य अशेषदुःखनिवृत्ति
निरतिशयसानन्दप्राप्तिपरमपुरुषार्थप्राप्तयेकरिष्यमाणपरमहंससंन्यासस्वीका
रार्थंतदंगत्वेनाष्टौश्राद्धानिसदैवानिसांकल्पिकविधिनाअन्नेनामद्रव्येणवातंत्रेण
करिष्यइतिसंकल्प्यसत्यवसुसंज्ञकाविश्वेदेवानान्दीमुखास्थानेक्षणःकर्त्तव्यः इ राम
त्येकंकृत्वातथैवद्वितीयंवृणुयात् एवंसर्वत्र तत्रप्रथमेदेवश्राद्धे ब्रह्मविष्णुमहेश्वराः २

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

नान्दीमुखाः स्थानेक्षणः कर्त्तव्यः एवं द्वितीये ऋषिश्राद्धे देवर्षिब्रह्मर्षिक्षत्रर्षयः ना
न्दीमुखाः स्थानेक्षणः कर्त्तव्यः २ तृतीये दिव्यश्राद्धे वसुरुद्रादित्याः नान्दीमुखाः स्था
नेक्षणः कर्त्तव्यः ३ चतुर्थे मनुष्यश्राद्धे सनकसनन्दनसनातनाः नान्दीमुखा
स्थानेक्षणः कर्त्तव्यः ४ पंचमे भूतश्राद्धे पृथिव्यादीनि पंचमहाभूतानि एकादश च
क्षुरादिकरणानि चतुर्विधो भूतग्रामः नान्दीमुखास्थानेक्षणः कर्त्तव्यः ५ षष्ठे पितृ
श्राद्धे पितृपितामहप्रपितामहाः नान्दीमुखाः स्थानेक्षणः कर्त्तव्यः ६ सप्तमे मातृश्रा
द्धे मातृपितामहीप्रपितामह्यः नान्दीमुखाः स्थानेक्षणः कर्त्तव्यः अष्टमे आत्मश्रा
द्धे आत्मपितृपितामहा नान्दीमुखा स्थानेक्षणः कर्त्तव्यः इत्यष्टादश ब्राह्मणान्नि
मंत्र्य तेषां पादान्प्रक्षाल्य यथापूर्वं प्राङ्मुखानुदक्संस्थानुपवेश्य प्रार्थयेत् सन्या

(3)

सं.
३

सार्थमहं श्राद्धं कुर्वे ब्रूत द्विजो नमाः अनुज्ञां प्राप्य युष्माकं सिद्धिं प्राप्स्यामि शाश्वतीम् ग
र्भवास भयाद्भीतस्तथा नापत्र्या यादिति गृहां प्रवेष्टु मिच्छामि परं पदमनामयम् ॐ कुरु
ष्वेति द्विजैरुक्ते कर्ता सर्वत्र द्विजकरेषु पादं दत्वा अ नुद्दूर्वायुग्मं यवसहितं गृहीत्वा सत्य
वसुसंज्ञक विश्वेदेवा नांदीमुखाः इदमासनं इति विप्रदक्षिणभागे आसनं दत्वा एवं वृद्धि
तीये विप्रे ततो ब्रह्माद्यष्टपार्वपार्थमुपविष्टेभ्यो द्वादशब्राह्मणेभ्य एवमेवासनानि दद्या
त् यथा ब्रह्मविष्णुमहेश्वराः नान्दीमुखाः इदमासनं १ देवर्षिब्रह्मर्षिक्षत्रर्षयः इद
मासनं २ वसुरुद्रादित्या नान्दीमुखाः इदमासनम् सनकसनन्दनसनातनाः नान्दी
मुखाः इदमा ३ पृथिव्यादीनि पंचमहाभूतानि एकादश चक्षुरादीकरणानि चतुर्विधो राम
भूतग्रामा नान्दीमुखाः इदमासनं पितृपितामहप्रपितामहा नांदीमुखा इदमासनं। ३

(8A)

मातृपितामही प्रपितामह्यः नान्दीमुखाः इदमासनं आत्मपितृपितामहाः नांदीमुखा इ
दमासनं इति सर्वत्रासनं दत्वा सत्यवसुसंज्ञका विश्वेदेवा नान्दीमुखाः एष गंधः स्वाहा न
मम इत्येवं सर्वेभ्यो द्विर्द्विः कनिष्ठिकया गंधं दत्वा पादे दद्यात् एवं श्वेतपुष्पधूपदीपाच्छादनानि
दद्यात् इमानि पुष्पाणि स्वाहा न मम एष धूपः स्वाहा न मम एष दीपः स्वाहा न मम इद
माच्छादनं निष्क्रयद्रव्यं स्वाहा न ममेति ततो द्विजाग्रे भोजनभाजनानि निधायोपस्तीर्य अन्ना
दि परिविष्य तदभावे आमं तन्निष्क्रयद्रव्यं वा निधाय गायत्र्या प्रोक्ष्य पृथिवीत इत्यभिमृश्य
सत्यवसुसंज्ञका विश्वेदेवा नान्दीमुखाः इदमन्नं आमं वा आमनिष्क्रयद्रव्यं वा यथाशक्ति
सोपस्करं स्वाहा हव्यं न ममेति सर्वत्र यथादैवतं अन्नत्यागं कृत्वा ततः प्रजापतेन त्व॰ पां
अनेन नान्दीमुखा देवादयः प्रीयंतामिति वदेत् ततो विप्राः बलिदानवर्जं भुंजीयुः ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५)

सं. ४

त्येषु उपास्मे पंचाक्षन्नमीतिच श्रावयित्वा संपन्नमिति सर्वत्र पृष्टे सर्वे रुचितमिति वदेयुः
त्वेदमामाहि ततः आचांतेषु विप्रेषु तांबूलं दक्षिणात्वेन द्राक्ष्यामलकनिष्क्रयद्रव्यं दातुमहमुत्स
ज्ये इति संकल्पपूर्वकं दत्वा उपसंपन्नमिति ब्राह्मणान्विसृज्य दाता रइति वरयाचनं ब्राह्मणान्प्र
दक्षिणीकृत्यौ प्रार्थयेत् सन्या सार्धमयाभाद्वेलत मे तद्विजो नमाः अनुज्ञां प्राप्य पुष्पाके सि
द्धिं प्राप्स्यामि शाश्वतीं गर्भजन्मजराभीतः संतापत्रयपतस्तथा गुहां प्रवेष्टुमिच्छामि परं पदम
नामयमिति तान्नमस्कृत्य कृतं कर्मेश्वरार्पणं कुर्यात् यस्य स्मृत्येति विष्णुस्मरणांते द्वि
राचामेदिति इतिनांदीश्राद्धवद्दृष्टादशब्राह्मणाध्यसबन्धनामगोत्ररूपवर्जं प्रथमा
विभक्त्यैव संक्षेपरीत्याष्टौ श्राद्धप्रयोगः   अथाश्वलायनकर्तृयजमानस्यप्रयोगः। संक
ल्प्य पार्वणविधिना अन्नेन आमेन वा करिष्ये इति विशेषः पूर्ववत् क्षणासने दत्वा ब्राह्म

आयतान्न हृष्टपुष्टे चेतसा

राम ४

... Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

पात्रे प्रागग्रदर्भोपरि विन्यसेत् देवार्थमर्घ्यपात्रमेकं अष्ट पार्वणार्थमष्टाविति एवं नव पात्राणि प्राक्
संस्थानि निधाय सर्वपात्रेषु द्विपत्रकपवित्रान्तर्हितेषु अप आसिंच्य शन्नो देवीति सकृदनुमंत्र्य प्रथ
मे वैश्वदेवार्घ्यपात्रे यवोसि धान्यराजो वेति यवानोप्य द्वितीयाद्यष्टसु तिलोसीति सोमेन प्रतिपा
त्रमावर्तयन् यवानोप्य गन्धपुष्पाणि दद्यात् ऊहप्रकारस्तु यवोसि सोमदेवत्यो गोसवे दे
वनिर्मितः प्रत्नवद्भिः प्रत्तः पुष्ट्या नान्दीमुखान्देवान्प्रीणयाहि नः स्वाहेति प्रथमपार्वणपात्रे द्वि
तीयेन नान्दीमुखान् ऋषीन्प्रीणयाहि नः स्वाहेति तृतीयेन नान्दीमुखान् दिव्यान्प्रीणयाहि नः स्वाहे
ति चतुर्थे नान्दीमुखान्मनुष्यान्प्रीणयाहि नः स्वाहेति पंचमे नान्दीमुखान् भूतानि प्रीणय
याहि नः स्वाहेति षष्ठे नान्दीमुखान्पितॄन्प्रीणयाहि नः स्वाहेति एवं सप्तमाष्टमयोर्यथास्थितः
पितृशब्दः ततः प्रतियुग्ममेकैकमर्घ्यपात्रं स्वाहार्घ्या इत्याहत्य निवेद्य सर्वत्रापो दद्यात् ॥

स. तत्र प्रथमदेवद्विजकरे अर्घ्यपात्रोपरि स्थपवित्रं निधाय पात्रांतरेणार्घ्यपात्रस्थजलं अर्घं गृही
५ त्वा या दिव्या इति मंत्रांते सत्यवसुसंज्ञका विश्वेदेवा नान्दीमुखाः इदमर्घ्यं स्वाहा न मम। इत्यर्घ्यं
दत्वा ततो वशिष्टार्धजलेन द्वितीयदेवद्विजे पूर्ववत् दत्वा एवमेवोत्तरत्रार्घ्यपात्रं द्वेधा विभज्य
प्रतिपार्वण निमंत्रितविप्रद्वये दद्यात् तत्प्रकारस्तु ब्रह्माविष्णुमहेश्वरा नांदीमुखा इदं वो
र्घ्यं स्वाहा न मम। विप्रहस्तात् सलक्षण आपोनुमंत्रयेत् या दिव्या आप इत्यनेन आपो दद्यात् द्वि
तीये देवर्षिब्रह्मर्षिक्षत्रर्षयः नान्दीमुखाः इदं वो अर्घ्यं स्वाहा न मम या दि. तृतीये वसुरुद्रा
दित्या नान्दीमुखाः इदं वोर्घ्यं स्वाहा न मम। चतुर्थे सनकसनंदनसनातनाः नान्दीमुखाः
इदं वोर्घ्यं स्वाहा न मम पंचमे पृथिव्यादीनि पंचमहाभूतानि एकादशचक्षुरादिकरणानि च राम
तुर्विधो भूतग्रामः नान्दीमुखाः इदं वोर्घ्यं स्वाहा न मम षष्ठे पितृपितामहप्रपितामहा नांदी ५

(5A)

मुखाः इदं वः अर्घ्यं स्वाहा न मम सप्तमे मातृपितामही प्रपितामह्यः नांदीमुखाः इदं वो अर्घ्यं स्वा
हा न मम अष्टमे आत्मपितृपितामहा नांदीमुखाः इदं वो अर्घ्यं स्वाहा न मम सर्वत्रार्घ्यदानांते
तेषां त्रं सुश्रीकृत्य पूर्वोक्तरीत्या गंधाद्याच्छादनदानांते भोजनपात्राण्यासाद्य अग्नौकरणार्थं
य मन्नमादाय हुताः कृत्वा आमपक्षे तंडुलान्वा गृहीत्वा ऽवदानसंपत्या वा यदा यावदानसंपत्या
ग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहेति मंत्राभ्यां वैश्वदेविकविप्रो विहाय यावच्छिष्टं वा
द्विजब्राह्मणकरेषु हुत्वा मधु इत्याद्यन्ना निपरिक्षिप्य आमपक्षे त्वामंत्रान्निक्षिप्य इत्यं वा ऽ
ष्टादशपात्रेषु निदध्यात् पूर्ववत् श्रावणानंतरं कच्चीसंपन्नमिति पृष्टे संपन्नमिति वदे
युः नेदमामादौ आचांतेषु द्विजेषु दूर्वादधियवकुशाजबदरीफलयुतान्नेन आमपक्षे से
कुन्ना वा पिंडदानं कुर्यात् यथा गोमयोपलिप्तभूमौ अपहतेति मंत्रावृत्या दक्षिणारंभाः

(6)

स. प्रागग्रतां उदक्संस्था अष्टरेखाः कृत्वा ता अस्य स्यसर्वासु प्रागग्रान् कुशान् अतिदी
दृ र्घदर्भा वा आस्तीर्य तासु रेखासु दक्षिणारेखामारभ्य प्रतिरेखं पिंडत्रयार्थस्थल त्रये प्रा
कृसंस्थं शुन्धंतामिति मंत्रेण जलं सिंचेत मंत्राश्च शुन्धन्तां ब्रह्मणो नान्दीमुखाः शु
न्धंतां विष्णवो नान्दीमुखाः शुन्धंतां महेश्वरा नान्दीमुखाः तदुत्तररेखायां शुन्धं
तां देवर्षयो नांदीमुखाः शुंधंतां ब्रह्मर्षयो नान्दीमुखाः शुन्धंतां क्षत्रर्षयो नान्दीमु
खाः तृ[illegible]तीयरेखायां शुन्धंतां वसवो नान्दीमुखाः शुन्धंतां रुद्रा नान्दीमुखाः शुन्धंता
मादित्या नान्दीमुखाः चतुर्थरेखायां शुन्धंतां सनका नान्दीमुखाः शुन्धंतां सनन्दना
नान्दीमुखाः शुन्धंतां सनातना नान्दीमुखाः पंचमरेखायां शुन्धंतां पृथिव्यादीनि राम
पंच महाभूतानि नान्दीमुखानि शुन्धंतां एकादशचक्षुरादीनि करणानि नान्दीमुखा ह

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6A)

ति शुन्धन्तां चतुर्विधभूतग्रामा नान्दीमुखाः षष्ठरेखायां शुन्धंतां पितरो नान्दीमुखाः शुन्धंतां पिताम
हा नान्दीमुखाः शुन्धंतां प्रपितामहा नान्दीमुखाः सप्तमरेखायां शुन्धंतां मातरो नान्दीमुखाः शु
न्धंतां पितामह्यो नान्दीमुखाः शुन्धंतां प्रपितामह्यो नान्दीमुखाः अष्टमरेखायां शुन्धंतां आ
त्मानो नान्दीमुखाः शुन्धंतां पितरो नान्दीमुखाः शुन्धंतां पितामहा नान्दीमुखाः इति सर्वत्र ज
लं सिंचेत् पूर्वोक्तद्रव्येण अष्टाचत्वारिंशत्पिंडान् कृत्वा उक्तरेखासु कृतजलसेकस्थले एकस्यै
वदेवतायै पिण्डद्वयं दद्यात् प्रतिपिण्डमंत्रावृत्तिरिति नारायणवृत्तिकाराः मतांतरे तु द्वितीयस्तू
ष्णीमिति पिण्डदानमंत्रास्तु ब्रह्मणे स्वाहा नान्दीमुखाः तदुत्तरतोऽपूर्ववद्वा द्वितीयः एवं
सर्वत्र विष्णवे स्वाहा नान्दीमुखाः २ महेश्वराय स्वाहा ना० २ द्वितीयरेखायां देवर्षिभ्यो ना
न्दीमुखेभ्यः स्वाहा २ ब्रह्मर्षिभ्यो नान्दीमुखेभ्य स्वाहा २ क्षत्रर्षिभ्यो नान्दीमुखेभ्यः स्वाहा २

(७)

सं. तृतीयरेखायां वसुभ्यो नान्दीमुखेभ्यः स्वाहा २ रुद्रेभ्यो नान्दीमुखेभ्यः स्वाहा २ आदित्येभ्यो
७ नान्दीमुखेभ्यः स्वाहा २ चतुर्थरेखायां सनकाय नान्दीमुखाय स्वाहा २ सनन्दनाय नान्दी
मुखाय स्वाहा २ सनातनाय नान्दीमुखाय स्वाहा २ पंचमरेखायां पृथिव्यादि पंचमहाभू
तेभ्यो नान्दीमुखेभ्यः स्वाहा २ एकादश चक्षुरादिकरणेभ्यो नान्दीमुखेभ्यः स्वाहा २ च
तुर्विधाय भूतग्रामाय नान्दीमुखाय स्वाहा २ षष्ठरेखायां पित्रे नान्दीमुखाय स्वाहा २ पि
तामहाय नान्दीमुखाय स्वाहा २ प्रपितामहाय नान्दीमुखाय स्वाहा २ सप्तमरेखायां
मात्रे नान्दीमुखायै स्वाहा २ पितामह्यै नान्दीमुखायै स्वाहा २ प्रपितामह्यै नान्दीमुखा
यै स्वाहा २ अष्टमरेखायां आत्मने नान्दीमुखाय स्वाहा २ पित्रे नान्दीमुखाय स्वाहा २ पि
प तामहाय नान्दीमुखाय स्वाहा २ अत्र पितरो मादयध्वमित्याद्यनुमंत्रणादि सर्वंकृताकृ राम ७

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(७A.)

तं पिण्डानुगन्धादिना संपूज्य नमस्कृत्योपसंपन्नमिति विसृज्य ब्राह्मणेभ्यः पूर्ववद्दक्षिणा
दानादि सर्वं कुर्यात् इति एवमष्टौ श्राद्धोत्तरं ब्रह्मणा अनुरोधेन तस्मिन्दिने द्वितीये वा शिखा
र्थं मूर्ध्नि पंचषट् केशान्स्थापयित्वा कक्षोपस्थवर्जं केशश्मश्रुलोमादिवपने विधाय नखा
नि निकृंत्य यथाविधि स्नात्वा कौपीनाच्छादनमुपयुज्य स्वात्मने आचार्याय दक्षिणार्थं हो
मार्थं च द्रव्यं पृथक्कृत्वा सति विभवे पुत्रेभ्यो भार्याभ्यो ज्ञातिभ्यो धनादि विभज्य संतर्प्य स्वीयं ध
नं सन्यासं दास्येभ्यो विप्रेभ्यो यतिभ्यश्च विभज्य तदवशिष्टं यावच्छेषमर्थिभ्यो दद्यात् असति विभ
वे स्वात्मानमेव तेभ्यो निवेदयेत् अथ देवागारे अग्न्यागारे नदीतीरे गोष्ठे रण्ये वा शुचौ दे
शे स्वकौपीनादि विवर्णं कृत्वा वैणवं सकलमाषग्रंथियुक्तं पोनिरछिद्रमदग्धं सत्वचं शि
रःप्रमाणं ललाटांतं भ्रूप्रमाणं वा दण्डमग्रशमस्थूलं समंलोत्वा ऽदितं विप्रानीतं सम

सं. ८ पवित्रं थिपुलं समुद्रकं संपाद्य शंखोदकेनाष्टोत्तरवारं प्रणवेन पुरुषसूक्तेन केशवादिना
ममंत्रैः स्थापिति बि [redacted] कं दण्डं जलपवित्रं शिक्यं पात्रं कमण्डलुं आस
नं कौपीनं आच्छादनं कंथा पादुके इति दश यद्वा जलपवित्रं शिक्यं पात्रं कमंडलुमिति
पंच वा संस्थाप्योप विश्यो दगयनादौ एकादश्यां द्वादश्यां वा आतुरश्चेत्कस्मिंश्चित्का
ले वा देशकालौ स्मृत्वा परमहंसादि संन्यासग्रहणं करिष्य इति संकल्प्य तदंगत्वेन वि
हितमादौ गणेशपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धानि च करिष्य इति संक
ल्प्य तानि कुर्यात्। आचम्य प्राणानायम्य [redacted] ब्रह्मांजलिं विधाय मनसा जपेत्
ॐ ब्रह्मणे नमः ॐ विष्णवे नमः ॐ रुद्राय नमः ॐ सूर्याय नमः ॐ सोमाय नमः ॐ राम
आत्मने नमः ॐ अंतरात्मने नमः ॐ परमात्मने नमः इत्युच्चार्य ॐ अग्निमीळे ॐ इ ८

(8A.)

घेत्वो र्जत्वा ॐ अग्न आयाहि ॐ शन्नोदेवी इति वेदादीन् जपित्वा सकृन्मुष्टित्रयं प्रणवेन
त्रिः प्राश्या चम्यनाभौकरं दत्वाभिमंत्रयेदभिर्मंत्रैः ॐ अं आत्मने स्वाहा ॐ उं अंतरात्मने
स्वाहा ॐ मं परमात्मने स्वाहा ॐ प्रजापतये स्वाहेति ततः पयो दधियुतमाज्यमापो वा
त्रिवृदसीति प्रथमं प्रवृदसीति द्वितीयं विवृदसीति तृतीयं पाश्य पापः पुनंत्विति जलं प्रा
श्याचामेत् ततः उपवासं करिष्यामीति संकल्पयेत् ततः सावित्रीप्रवेशः यथा ॐ भूः
सावित्रीं प्रविशामि तत्सवितुर्वरेण्यं ॐ भुवः सावित्रीं प्रविशामि भर्गो देवस्य धीमहि
ॐ स्वः सावित्रीं प्रविशामि धियो यो नः प्रचोदयात् इति जपेत् किंचन प्राश्नीयात्
ततः अस्तमयात्प्रागौपासनाग्निं समिध्य विच्छिन्नश्चेत्पुनः सन्धानं अग्नित्यागप्रायश्चित्तहो
मद्रव्यदानपूर्वकं कुर्यात् अनाहिताग्नि विधुरेणाष्टछोदि विविधानेनाग्निरुत्पादनीयः

(9)

सं. ९ तथाच कात्यायनः औपासनं त्वावसथ्यं दृष्टोदिविजमेव वा लौकाग्निमितरं वापि श्रद्धा
वान् स यदा भवेत् तत्र आचम्य प्राणानायम्य देशकालौ स्मृत्वाग्न्याधानाद्यर्थं वि
धुरकल्पोक्तविधुराग्निमुत्पादयिष्ये इति संकल्प्य स्थंडिले लेखामुल्लिख्य व्याहृतिभिः प्र
णवेन च श्रोत्रियागारादग्निमाहृत्य अग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः
अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततान इति मंत्रेण स्थंडिले दाग्नेयां
दिशि निधाय दृष्टो दिवि दृष्टो अग्निः पृथिव्यां दृष्टो विश्वा ओषधीराविवेश। वैश्वानरः
सहसा दृष्टो अग्निः स नो दिवा सरिषः पातु नक्तं इति मंत्रेण स्थंडिले लेखासु प्रतिष्ठाप्य
तेनैव मंत्रेण काष्ठैः समिध्य परिसमुह्य तत्सवि. स्वाहा सवित्र इदं ना॰ सवितुर्व राम
रेण्यस्य चित्रामाहं वृणे सुमतिं विश्वजन्यां यामस्य कण्वो अदुहत्प्रपीनां सहस्र ९

अद्यानो देव सवितः प्रजावत्सावीः सौभगं । परादुःष्वप्नियं सुव स्वाहा । सवित्र इदं ९

धारां पयसा मह्यं गामश्वं स्वाहा सवित्र इदं विश्वानि देव सवितर्दुरितानि परासुव यद्भद्रं तन्न आ
(9A) सुव स्वाहा सवित्र इदं इति तिस्रः समिधोऽभ्याधाय पुनः परिसमुह्य यस्य स्मृत्येति विष्णुं स्मरेत् ए
वमग्निसिद्धिं कृत्वा विधुरोऽग्निं समिन्धनं कुर्वीत ततो ब्रह्मान्वाधानम् अस्मन्माना पूर्वं प्राणाना
यम्य देशकालौ संकीर्त्य परमहंससंन्यासं कर्तुं तत्र विहितं ब्रह्मान्वाधानं करिष्य इति संकल्प्या
ग्नीन्धनाद्याज्यसंस्कारांते स्रुक्स्रुवौ संमृज्य [illegible] स्रुचि चतुर्गृहीतं गृहीत्वा ॐ स्वाहेति
हुत्वा परमात्मन इदं न ममेति त्यजेत् उत्तरपरिषेकं कृत्वा यस्य स्मृत्येति विष्णुं स्मरेत् एवं
ब्रह्मान्वाधानं ततः संध्यावंदनपूर्वकं सायमित आदित्ये स्वाग्नौ नित्यहोमे कृते वैश्वदेवं कुर्या
त् अथ सायंहोमानंतरमुत्तरेणाग्निं तृणानि संस्तीर्य तेषु दंडादीनि दश यस्यादीनि पंच
वाद्वन्द्वश आसाद्य दक्षिणेनाग्निं कुशेषु कृष्णाजिनमास्तीर्य तस्मिन्नुपविश्य गायत्रीं जपन्

Joint project of the Rajwade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(१०)

सं. जागरणं कुर्यात् ततो ब्राह्मे मुहूर्ते उत्थाय यथाविधि स्नात्वा प्रातःसन्ध्यां प्रातर्होमं वैश्वदेवादि
१० कृत्वा प्राणानायम्य आहुतीर्जेवित्वा आग्नेयस्थालीपाकं कुर्यात् तत्र प्रयोगः देशकालौ संकी
र्त्य परमहंससंन्यासं करिष्यमाणोमुकशर्माहं तत्पूर्वांगत्वेन विहितमाग्नेयस्थालीपाकं करि
ष्य इति संकल्प्य इध्माबर्हिषी सन्नह्य पल्यवहंति चरुं श्रपयित्वेत्यादि पार्वणस्थालीपाकवत्
सर्वं कुर्यात् आश्वलायनानां तु संकल्पं कृत्वा चत्वारिशृंगेत्यग्निं ध्यात्वान्वादध्यात् अस्मिन्नन्वा
हितेग्नावित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा प्रधानदेवतामग्निं चरुद्रव्येण शेषेणेत्यादि पूर्णपात्र
निधानांते सपवित्रे शूर्पे अग्नये त्वा जुष्टं निर्वपामीति चतुरो मुष्टीन्निरूप्य तथैव प्रोक्ष्येत्यादि
आज्यभागांते प्रधानहोमे ऽग्नये स्वाहेति हुत्वा यदस्येति स्विष्टकृतं च हुत्वा शेषं स्थालीपाकवत् राम
कुर्यादिति ततो भूर्भुवस्वरित्यप्सु स्पृष्ट्वा तरत्समन्दीति सूक्तमप्सु जपेत् विप्रान्संभोज्य कर्मणाः १०

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com